शुशान्ताया गीतम् । शशिध्वजकन्यया कल्केर्विवाहः । शशिध्वजस्य हरिभक्तिकारणम् । शशिध्वजस्य पूर्वजन्मवृत्तान्तकथनम् । भक्तिलक्षणम् । हरिभक्तस्य संग्रामप्रवृत्तिकारणम् । द्विविदोपाख्यानम् । कृष्णावतारवृत्तान्तः । कल्केः काञ्चनपुर्य्यां प्रवेशः । विषकन्यासंवादः । कल्केरनुचराणां पृथक् पृथक् राज्येऽभिषेकः । कल्केः शम्भले प्रतिगमनम् । सत्ययुगप्रवर्त्तनम् । मायास्तवः । विष्णुयशसो राजसूययज्ञारम्भः । नारदस्यागमनम् । मायाजीवयोः कथोपकथनम् । विष्णुयशसो वनगमनम् । परशुरामस्यागमनम् । रुक्मिणीव्रतकथनम् । कल्केः पत्नीभिर्विहारः । शम्भले देवानामागमनम् । कल्केः स्वर्गारोहणम् । गङ्गास्तोत्रम् । कल्किपुराणस्यानुक्रमणिका । कल्किपुराणश्रवणादिफलम्” ।

**कल्प** पु० कल्पते समर्थो भवति स्वक्रियायै विरुद्धलक्षणया असमर्थो भवति वाऽत्र, क्लृप् सामर्थ्ये विरुद्धलक्षणया असामर्थ्ये वा आधारे घञ् कल्पयति सृष्टिं विनाशं वात्र क्लृप–णिच्–आधारे अच् । ब्रह्मणो रात्रिरूपे जगतां चेष्टाराहित्यसम्पादके १प्रलये २तस्य दिनरूपे जगतां चेष्टासम्पादके च कालभेदे । “यदा स देवो जागर्त्ति तदेदं चेष्टते जगत् । यदा स्वपिति शान्तात्मा तदा सर्वं निमीलति” मनुना जगच्चेष्टातद्राहित्ययोर्ब्रह्माहोरात्रयोरुक्तेस्तथात्वम् ।

कलिशब्दे दर्शितवाक्येन युगमानमुक्त्वा कल्पमानं प्रदर्श्य ब्रह्मणः आयुःपरिमाणं तस्य गतायुःकालश्च सू०सि० उक्तो यथा—

“युगानां सप्ततिः सैका मन्वन्तरमिहोच्यते । कृताब्दसङ्ख्यस्तस्यान्ते सन्धिः प्रोक्तो जलप्लवः” सू०। “युगानां सैका सप्ततिरेकसप्ततिर्महायुगमित्यर्थः । इह–मूर्त्तकाले । मन्वन्तरं मन्वारम्भतत्समाप्तिकालयोरन्तरकालमानमित्यर्थः । मूर्त्तकालमानभेदाभिज्ञैः कथ्यते । तस्य मनोरन्ते विरामे जाते सति कृताब्दसङ्ख्यः मदुक्तकृतयुगवर्षमितः सन्धिः कालविद्भिः प्रकर्षेण द्वितीयमन्वारम्भपर्य्यन्तं भूतभाविमन्वोरन्तिमादिसन्धिरूपैककालेम कथितः । तत्स्वरूपमाह “जलप्लव इति । जलपूर्णा सकला पृथ्वी तस्मिन् लोकसंहारकाले भवति । अथ कल्पप्रमाणं सविशेषमाह” रङ्ग० । “ससन्धयस्ते मनवः कल्पे ज्ञेयाश्चतुर्दश । कृतप्रमाणः कल्पादौ सन्धिः पञ्चदशः स्मृतः” सू० । “ते एकसप्ततियुगरूपा मनवः स्वायम्भुवाद्याः ससन्धयः स्वस्वसन्धिसहिताश्चतुर्द्दशसङ्ख्याकाः कल्पकाले ज्ञातव्याः । स्वसन्धियुक्तचतुर्द्दशमनुभिः कल्पः स्यादित्यर्थः । ननु ग्रन्थान्तरे कल्पमानं युगसहस्रं त्वया तु युगमानमेकसप्ततिगुणं मनुमानं ३०६७२०००० कृताब्द १७२८००० युक्तं ससन्धिमनुमानं ३०८४४८००० इदं चतुर्द्दशगुणं ४३१८७२०००० कल्पप्रमाणं तच्च कृतोनं युगसहस्रमित्यत आह । कृतप्रमाण इति । कल्पादौ प्रथममन्वारम्भे कृतयुगवर्षमितो मनोश्चतुर्दशत्वेऽप्याद्यः पञ्चदशकः सन्धिः कालज्ञैरुक्तः । तथा च कृतवर्षानन्तरं प्रथममन्वारम्भ इति तद्वर्षयोजनेनाविरोध इति भावः। अथ ब्रह्मणो दिनरात्र्योः प्रमाणमाह” रङ्ग० । “इत्थं युगसहस्रेण भूतसंहारकारकः । कल्पो ब्राह्ममहः प्रोक्तं शर्वरी तस्य तावती” सू० । “इत्थं पूर्व्वोक्तप्रकारसिद्धेन युगसहस्रेण भूतसंहारकारको लयात्मकः कल्पकालो ब्राह्मं ब्रह्मणः सम्बन्ध्यहः दिनं कालज्ञैरुक्तम् । तस्य ब्रह्मणस्तावती दिनपरिमिता शर्व्वरी रात्रिः । कल्पद्वयं तदहोरात्रमिति फलितार्थः। अथ ब्रह्मणआयुःप्रमाणमतीतवयःप्रमाणं चाह” रङ्ग० । “परमायुः शतं तस्य तयाहोरात्रसङ्ख्यया । आयुषोऽर्द्धमितं तस्य शेषकल्पोऽयमादिमः” सू० । परमपरं शृणु पूर्व्वोक्तं त्वया श्रुतमपरं च वक्ष्यमाणं शृणु त्वम् । यद्वा परमेति दैत्यवरार्थकं सम्बोधनम् । त्वं तस्य ब्रह्मणस्तया पूर्व्वोक्तयाहोरात्रमित्या कल्पद्वयरूपया शतं शतवर्षपरिमितमायुः शरीरधारणकालं जानीहि । एतदुक्तं भवति । अहोरात्रमानात् पूर्व्वपरिभाषया (३०) मासमानं तस्मात् पूर्व्वोक्तपरिभाषया (१२) ब्रह्मणो वर्षमानमेतच्छतसङ्ख्यया ब्रह्मायुरिति । न तु यथाश्रुतार्थेन कल्पशतद्वयमायुः, कीटादीनामपि दिनसङ्ख्ययायुषोऽनुक्तेः सुतरां ब्रह्मणः शतदिनात्मकायुषोऽसम्भवात् “निजेनैव तु मानेन आयुर्वर्षशतं स्मृतम्” इति विष्णुपुराणोक्तेश्च । एतेन परमा–इत्येकं पदमिति निरस्तम् ब्रह्मणोऽनियतायुर्दायासम्भवात् । तस्य ब्रह्मण आयुः शतवर्षरूपमस्यार्द्धं पञ्चाशद्वर्षपरिमितमितं गतम् । अयं वर्त्तमान आदिमः प्रथमः शेषकल्पः शेषायुर्दायस्य ब्रह्मदिवस उत्तरार्द्धस्य प्रथमदिवसो वर्त्तमान इति फलितार्थः । अथ वर्त्तमानेऽस्मिन् दिवसेऽप्येतद्गतमित्याह” रङ्ग० । “कल्पादस्माच्च मनवः षड् व्यतीताः ससन्धयः । वैवस्वतस्य च मनोर्युगानां त्रिघनो गतः” सू० । “अस्माद्वर्तमानात् कल्पाद् ब्रह्मदिवसात् षट्सङ्ख्याका मनव एकसप्ततियुगरूपाः ससन्धयः सप्तभिः सन्धिभिः कृतयुगप्रमाणैः सहिता